Shri Raghunath Temple MSS. Library,
JAMMU

No. १०८९-घ

Title पवन विजय: (स्वरोदय:)

Author

Extent १५ Age

Subject तन्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

पवनविजयः

स्वरोदयः

१०८५

१४ पत्रे

© Dharmartha Trust J&K. Digitized by eGangotri

सं. १०८८९

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ स्व. द. २

ॐ श्रीगणेशाय नमः ॥ महेश्वरं नमस्कृत्य प्रालेयाचलनायकम् । गुरुं च परमात्मानं नित्यं संसार
तारकम् १ श्रीदेव्युवाच देवदेव महादेव कृपां कृत्वा ममोपरि । सर्वसिद्धिकरं ज्ञानं कथयस्व मम
प्रभो २ कथं ब्रह्माण्डमुत्पन्नं कथं वा परिवर्तते । कथं विलीयते देव वद ब्रह्माण्डनिर्णयः ३ श्री
ईश्वर उवाच तत्त्वाद्ब्रह्माण्डमुत्पन्नं तत्त्वेन परिवर्तते । तत्त्वे विलीयते देवि तत्त्वाद्ब्रह्माण्डनिर्णयः ४
श्रीदेव्युवाच तत्त्वमेव परं मूलं निश्चितं तत्त्ववादिभिः । तत्त्वस्वरूपं किं देव तत्त्वमेव प्रकाशय ५ ईश्व
र उवाच निरंजनो निराकार एको देवो महेश्वरः । तस्मादाकाशमुत्पन्नमाकाशाद्वायुसंभवः ६
वायोस्तेजस्ततश्चापस्ततः पृथ्वीसमुद्भवः । एतानि पंचतत्त्वानि विस्तीर्णानि च पंचधा ७ तेभ्यो ब्रह्मा
ण्डमुत्पन्नं तैरेव परिवर्तते । विलीयते च तत्रैव तत्रैव रमते पुनः ८ पंचतत्त्वमये देहे पंचतत्त्वानि सुन्दरि
सूक्ष्मरूपेण वर्तन्ते ज्ञायन्ते तत्त्वयोगिभिः ९ अतः परं प्रवक्ष्यामि शरीरस्थं स्वरोदयम् । हंसचारस्वरूपेण
भवेज्ज्ञानं त्रिकालजं १० गुह्याद्गुह्यतरं सारमुपकारप्रकाशकम् । इदं स्वरोदयं ज्ञानं ज्ञानानां मस्तके
मणिः ११ सूक्ष्मात्सूक्ष्मतरं ज्ञानं सुबोधं सत्यप्रत्ययम् । आश्चर्यं नास्तिके लोके आधारस्त्वास्तिके राम
जने १२ अथ शिष्यलक्षणम् शान्ते शुद्धे सदाचारे गुरुभक्त्यैकमानसे । दृढचित्ते कृतज्ञे च देयं चैव स्व १

© Dharmartha Trust J&K. Digitized by eGangotri

रोदयं १३ दुष्टे च दुर्जने क्रुद्धेऽश्रसत्ये गुरुतल्पगे हीनसत्वे दुराचारे स्वरज्ञानं न दीयते १४ शृणु त्वं
कथितं देवि देहस्थं ज्ञानमुत्तमम् येन विज्ञानमात्रेण सर्वज्ञत्वं प्रजायते १५ स्वरे वेदाश्च शास्त्राणि स्व
रे गांधर्वमुत्तमम् स्वरे च सर्वं त्रैलोक्यं स्वरमात्मस्वरूपकम् १६ स्वरहीने च दैवज्ञे नाथहीने यथा गृ
हम् शास्त्रहीने यथा वक्त्रे शिरोहीने च यद्वपुः १७ नाडीभेदं तथा प्राणं तत्वभेदं तथैव च सुषुम्ना
मिश्रभेदं च यो जानाति स मुक्तिगः १८ साकारे वा निराकारे शुभे वायुबलात्कृते कथयंति शुभे केचि
त्स्वरज्ञाने वरानने १९ ब्रह्माण्डखण्डपिण्डाद्याः स्वरेणैव हि निर्मितम् सृष्टिसंहारकर्ता च स्वरः साक्षान्म
हेश्वरः २० स्वरज्ञानात्परं गुह्यं स्वरज्ञानात्परं धनम् स्वरज्ञानात्परं मित्रं न वा दृष्टं न वा श्रुतम् २१ शत्रुं
हन्यात्स्वरबले तथा मित्रसमागमे लक्ष्मीः प्राप्तिः स्वरबले कीर्तिः स्वरबले सुखम् २२ कन्याप्राप्तिः स्व
बले स्वरे च राजदर्शनम् स्वरे च देवतासिद्धिः स्वरे च क्षितिपो वशः २३ स्वरेण गम्यते देशो भोज्यं स्वरब
लेन तथा लघुदीर्घं स्वरबले मलं चैव निवारयेत् २४ सर्वशास्त्रपुराणादिस्मृतिवेदांगपूर्वकम् स्वरज्ञा
नात्परं तत्वं नास्ति किंचिद्वरानने २५ नामरूपादिकाः सर्वे मिथ्या सर्वेषु विभ्रमः अज्ञानमोहिता मूढा
यावत्तत्वं न विद्यते २६ इदं स्वरोदयं शास्त्रं सर्वशास्त्रोत्तमोत्तमम् आत्मघटप्रकाशार्थं प्रदीपकलि

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰
शा॰
२

कोपमम् २७ यस्मिन्विस्मिनवनाद्यौ प्रोतोचषसूत्रेरुतवे तस्मादेतत्स्वयंज्ञेयंआत्मनैवात्मनात्मनि २८
नतिष्ठिनेचनस्तत्रेनवारोग्रहदेवता नचविहिद्वितीयातोवेद्यन्याचात्मथैवच २९ कुयोगानास्तिदे
वेशिभवतिनकदाचन प्राणेस्वरवलेयुक्तंसर्वमेवशुभंफलम् ३० देहमध्येस्थितानाड्योवद्भरूपा
सुविस्तराः ज्ञातव्याश्चबुधैर्नित्यंस्वदेहज्ञानहेतवे ३१ नाभिस्थानककंदोर्ध्वअंकुरादेवनिर्गताः द्वि
सप्ततिसहस्राणिदेहमध्यव्यवस्थिताः ३२ नाभिस्थाकुंडलीशक्तिर्भुजंगाकारशायिणी ततोदशो
र्ध्वगानाड्योदशैवाधःप्रतिष्ठिताः ३३ द्वेद्वेतिर्यग्गतानाड्यश्चतुर्विंशतिसंख्यया प्रधानादशनाड्य
स्तदशवायुप्रवाहकाः ३४ तिर्यगूर्ध्वमधःस्थाप्रवायुदेहसमन्विताः चक्रवत्संस्थितादेहेसर्वप्रा
णसमाश्रिताः ३५ तासांमध्येदशश्रेष्ठादशानांतिस्रउत्तमाः इडाचपिंगलाचैवसुषुम्णाचतृतीयका
३६ गांधारीहस्तिनीजिह्वापूषाचैवयशस्विनी अलंबुषाकुहूश्चैवशंखिनीदशमीतथा ३७ इडावा
मेस्थितानाभागेदक्षिणेपिंगलातथा सुषुम्णामध्यदेशेतुगांधारीवामचक्षुषि ३८ दक्षिणेहस्तिजि
ह्वाचपूषाकर्णेचदक्षिणे यशस्विनीवामकर्णेआननेचाप्यलंबुषा ३९ कुहूश्चलिंगदेशेतुमूलस्थाने
चशंखिनी एवंद्वारंसमाश्रित्यतिष्ठंतिदशनाडिकाः ४० इडापिंगलासुषुम्णाप्राणमार्गेसमाश्रिताः

राम
२

© Dharmartha Trust J&K. Digitized by eGangotri

एताविदशनाड्यस्तुदेहमध्येव्यवस्थिता: ४१ नामानितुनाडिकानांतुवातानांप्रवदाम्यहम् प्राणोपान:
समानश्चउदानोव्यानएवच ४२ नागःकूर्मोथकृकलोदेवदत्तोधनंजयः हृदिप्राणोवसेन्नित्यमपानो
गुदमंडले ४३ समानोनाभिदेशेतुउदान:कंठमध्यग: व्यानोव्यापिशरीरेषुप्रधानादशवायव: ४४
प्राणाद्या: पंचविख्याता:नागाद्या:पंचवायव: तेषामपिचपंचानांस्थानानिचवदाम्यहम् ४५ उद्गारे
नागआख्यात:कूर्मउन्मीलनेस्मृत: कृकलोक्षुतकृज्ञेयोदेवदत्तोविजृंभणे ४६ नजहातिमृतेवा
पिसर्वव्यापीधनंजय: एतेनाडीषुसर्वासुभ्रमंतेजीवरूपिण: ४७ प्रकटंप्राणसंचारंलक्षयेद्देहमध्य
त: इडापिंगलासुषुम्णानाडीभिस्त्रिभिर्बुध: ४८ इडावामेचविज्ञेयापिंगलादक्षिणेस्मृता इडानाडी
स्थितावामेततोव्यस्ताचपिंगला ४९ इडायांतुस्थितश्चंद्र: पिंगलायांचभास्कर: सुषुम्णाशंभुरूपेण
शंभुर्हंसस्वरूपक: ५० हकारोनिर्गमेप्रोक्त: सकारेणप्रवेशने: हकार:शिवरूपेणसकार:शक्तिरु
च्यते ५१ शक्तिरूपस्थितश्चंद्रोवामनाडीप्रवाहक: दक्षनाडीप्रवाहश्चशंभुरूपीदिवाकर: ५२ श्वासेस
कारसंस्थेनुयत्दानंदीयतेबुधै: नहानंजीवलोकेस्मिन्कोटिकोटिगुणंभवेत् ५३ अनेनलक्षयेयोगी
चैकचित्त:समाहित: सर्वमेवविजानीयान्मार्गेविचंद्रसूर्ययो: ५४ ध्यायेतत्वंस्थिरेजीवेअस्थिरेनकदा

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰ र 3

चन इष्टसिद्धिर्भवेन्नस्य महालाभो जयस्तथा ५५ चन्द्रसूर्यसमभ्यासं ये कुर्वन्ति सदा नराः अतीता
नागतं ज्ञानं तेषां हस्तगतं सदा ५६ वामे चामृतरूपं स्याज्जगदाप्यायनं परम् दक्षिणे चरभागेन ज
गदुत्पादयेत्सदा ५७ मध्यमा भवति क्रूरा दुष्टा सर्वत्र कर्मसु सर्वत्र शुभकार्येषु वामा भवति सिद्धिदा
५८ निर्गमे तु शुभा वामा प्रवेशे दक्षिणा शुभा चन्द्रः समस्तु विज्ञेयो रविस्तु विषमः सदा ५९ चन्द्रः स्त्री पुरु
षः सूर्यश्चन्द्रो गौरोऽसितो रविः चन्द्रनाडीप्रवाहेन सौम्यकर्माणि कारयेत् ६० सूर्यनाडीप्रवाहेन रौद्रक
र्माणि कारयेत् सुषुम्णायाः प्रवाहेन सिद्धिमुक्तिफलानि च ६१ आदौ चन्द्रः सिते पक्षे भास्करस्तु सितेतरे
प्रतिपत्यादिनान्याहुः त्रीणि त्रीणि क्रमोदये ६२ सार्द्धद्विघटिका ज्ञेया शुक्ले कृष्णे शशी रविः वहन्त्येक
दिनेनैव यथा षष्टिघटिक्रमात् ६३ वहेत्तावद्घटीमध्ये पञ्चतत्त्वानि निर्दिशेत् प्रतिपत्यादिनान्याहुर्विपरी नि ४
ते विपर्ययः ६४ शुक्लपक्षे भवेद्वामा कृष्णपक्षे च दक्षिणा जानीयात्प्रतिपत्पूर्वं योगी तद्गतमानसः
६५ उदयं चन्द्रमार्गेण सूर्येणास्तंगतं यदि तदा तिगुणसंघाते विपरीते विपर्ययः ६६ शशाङ्कं वार
येद्रात्रौ दिवा वार्यो दिवाकरः इत्यभ्यासरतो नित्यं स योगी नात्र संशयः ६७ सूर्येण बध्यते सूर्यः चन्द्रश्च
न्द्रेण बध्यते यो जानाति क्रियामेतां त्रैलोक्यं वशयेत्क्षणात् ६८ गुरुशुक्रबुधेन्दूनां वासरे वामनाडि राम

र

© Dharmartha Trust J&K. Digitized by eGangotri

का सिद्धिदा सर्वकार्येषु शुक्लपक्षे विशेषतः १९ अर्कांगारकसौरीणां वासरे दक्षनाडिकाः स्मृता ।
व्याघ्रकार्येषु कृष्णपक्षे विशेषतः २० प्रथमे वहते वायुः द्वितीये च तथानलः तृतीये वहते भूमा हेयं
चतुर्थे वारुणं वहेत् २१ एकैकस्य घटी पंच क्रमेणैवोदयंति च क्रमाद्वैकैकनाडीनां तत्त्वानां पृथगुद्भ
वः २२ अहोरात्रस्य मध्ये तु ज्ञेया द्वादश संक्रमात् वृषकर्कटकन्यालिमृगमीननिशाकरे २३ मे
षसिंहे च धनुषि तुलायां मिथुने घटे उदयो दक्षिणे ज्ञेयः शुभाशुभविनिर्णयः २४ तिष्ठन्पूर्वोत्तरे
चन्द्रो भानुः पश्चिमदक्षिणे दक्षनाडीप्रवाहे तु न गच्छेद्याम्यपश्चिमे २५ वामचारप्रवाहे तु न गच्छे
त्पूर्वमुत्तरे परिपंथिभयं तस्य गतो सौ न निवर्तते २६ तस्मात्तत्र न गंतव्यं बुधैः सर्वहितैषिभिः त
दा तत्र तु संयाते मृत्युरेव न संशयः २७ शुक्लपक्षे द्वितीयायां अर्के वहति चंद्रमाः दृश्यते लाभदः
पुंसां सौम्ये सौख्यं प्रजायते २८ सूर्योदये यदा सूर्यः चंद्रश्चंद्रोदयो भवेत् उद्वेगकलहो हानिः
शुभं सर्वं निवारयेत् २९ सूर्यस्य वाहः प्रवदंति विज्ञा नेत्रास्तस्य तोयुक्तमनिष्पत्तेः श्वासेन युक्तस्य
तत्पीतरवे प्रवाहकाले फलमस्य सत्स्यात् ३० विपरीतलक्षणम् यदा प्रत्युषकाले तु विपरीतोद
यो भवेत् चंद्रस्थाने वहत्यर्को रविस्थाने च चंद्रमाः ३१ प्रथमे मनसोद्वेगं धनहानिर्द्वितीयके तृती

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰
४

येगमनेप्रोक्ते ऽष्टनाशो चतुर्थके ८२ पंचमे राजविध्वंसं षष्ठे सर्वार्थनाशनम् सप्तमे व्याधिदुः
खानि अष्टमे मृत्युमादिशेत् ८३ कालत्रये दिनान्यष्टौ विपरीते यदा वहेत् तदा दुष्टफलं प्रोक्तं
किंचिन्न्यूनं तु शोभने ८४ प्रातर्मध्याह्नयोश्चंद्रः सायंकाले दिवाकरः तदा नित्यजयं लाभं विप
रीते विपर्यये ८५ वामे वा दक्षिणे वापि यत्र संक्रमते रविः कृत्वा तत्पादमादौ च यात्रा भवति
सिद्धिदा ८६ चंद्रः समपदः कार्यो रविस्तु विषमः सदा पूर्णपादं पुरस्कृत्य यात्रा भवति सिद्धिदा ८७
चंद्रवारश्चतुष्पादः पंचपादस्तु भास्करे एवं चगमतः प्रोक्तं साधयेद्भुवनत्रयम् ८८ यत्राङ्गे वहते
वायुस्तदङ्गस्थः करस्तलात् सुप्तोत्थितो मुखं स्पृष्ट्वा लभते वाञ्छितं फलम् ८९ परदत्ते तथा ग्राह्ये गृहान्नि
र्गमनेऽपि च यदङ्गे वहते नाडी ग्राह्यं तेन कराङ्घ्रिणा ९० नहानिः कलहो नैव कंटकैर्नापि भिद्यते।
निवर्तते सत्वे नैव सर्वोपद्रववर्जितः ९१ गुरुबन्धुनृपामात्यास्त्वन्येपि शुभदायिनः पूर्णाङ्गे ख
लु कर्तव्याः कार्यसिद्धिमभीप्सता ९२ अरिचौराधमर्णाद्या अन्येप्युत्पातविग्रहाः कर्तव्याः खलु रि
क्ताङ्गे जयलाभसुखार्थिभिः ९३ दूरदेशे विधातव्यं गमनं तु हिमद्युतौ अभ्यर्णदेशे दीप्तेन तु र।
णे विनिके चन ९४ शून्यनाडी विपर्यस्तं यत्पूर्वं प्रतिपादितम् जायते नान्यथा चैव यथा सर्वज्ञ

राम
४

© Dharmartha Trust J&K. Digitized by eGangotri

भाषिते ९५ यत्किंचित्सर्वमुद्दिष्टं लाभादिसमरागमे तत्सर्वं दक्षिणानाडीषु ज्ञायते निर्विकल्पकम् ९६
व्यवहारे खलोच्चाटे द्वेषविद्यादिवंचके कुपितस्वामिचौराद्याहस्ताः स्युर्भयंकराः ९७ दूराध्वाने सु
भे चंद्रो निर्विघ्नं जनमिच्छति प्रवेशकार्यहेतौ तु सूर्यः शीघ्रं प्रशस्यते ९८ चंद्रचारे विषघ्ने तु सूर्यो बालो
वशं नयेत् सुषुम्णायां भवेन्मोक्षः एको देवस्त्रिधा स्थितः ९९ अयोग्ययोग्यता नाडी योग्यस्थानेष्व
योग्यता कार्यानुबंधनो जीवः कथं रुद्रः समाचरेत् १०० शुभाशुभानि कार्याणि क्रियंते ऽहर्निशं सदा त
दा कार्यनिरोधेन कार्यं नाडीप्रचालनम् अथेडा स्थिरकर्माण्यलंकारे दूराध्वगमने तथा आश्र
मे हर्म्यप्रासादे वस्तूनां संग्रहेऽपि च २ वापीकूपतडागादि प्रतिष्ठास्तंभदेवयोः यात्रादाने विवाहे च व
स्त्रालंकारभूषणे ३ शांतिके पौष्टिके चैव दिव्यौषधिरसायने स्वस्वामिदर्शने मैत्रे वाणिज्ये धनसंग्रहे
४ गृहप्रवेशे सेवायां कृष्यां च बीजवापने शुभकर्मणि संधौ च निर्गमे च शुभे शशी ५ विद्यारंभादिकार्ये
षु बांधवानां च दर्शने जन्ममोक्षे च धर्मे च दीक्षायां मंत्रसाधने ६ कालविज्ञानसूत्रे च चतुष्पदगृहागमे
कालव्याधिचिकित्सायां स्वामिसंबोधने तथा ७ गजाश्वारोहणे धन्वी गजाश्वानां च बंधने परोपकारणे चै
व निधीनां स्थापने तथा गीतवाद्यादिनृत्यादौ गीतशास्त्रविचारणे पुरग्रामनिवेशे च तिलके क्षेत्रधार

© Dharmartha Trust J&K. Digitized by eGangotri

स्व· ५ णे ८ आर्तिशाकेविषादेचज्वरितेमद्भिकैतेपिवा स्वजनस्वामिसंवंधेधान्यादिसंग्रहे ९ स्त्रीणांदंता
दिसंस्कारेपुष्टिरागमनेतथा गुरुशत्रुविषादीनांचालनेचवरानने १० उग्रयोसिद्धिदश्चोक्तोयोगाभ्यासा
दिकर्मच तत्रापिवर्जयेद्वायुस्तेजश्चाकाशमेवच सर्वकार्याणिसिद्ध्यंति दिवारात्रिगतान्यपि सर्वेषु
६ शुभकार्येषुचंद्रचारःप्रशस्यते १२ अथपिंगला कठिनक्रूरविद्यानांपठनेपाठनेतथा स्त्रीसंगवेश्या
गमनेमहानौकादिरोहणे १३ भ्रष्टकार्येसुरापानेवीरमंत्राद्युपासने वह्निलोध्वंसदेशादिविषदाना
दिवैरिणां १४ शास्त्राभ्यासेचगमनेमृगयापशुविक्रये यष्टिकायांचपाषाणेरत्नघर्षणदारुणे १५ गजा
भ्यासेयंत्रतंत्रेदुर्गपर्वतरोहणे द्यूतेचौरेगजाश्वादिरथसाधनवाहने १६ व्यायामेमारणोच्चाटे ष
ट्कर्मादिकसाधने यक्षिणीयक्षवेतालाः विषभूतादिनिग्रहे खरोष्ट्रमहिषादीनांगजाश्वानांचरो
हणे नदीजलौघतरणेभेषजेलिपिलेखने १७ मारणेमोहनेस्तंभेविद्वेषोच्चाटनेवशे प्रेरणाकर्षणे
क्षोभेदानेचक्रयविक्रये १८ खड्गहस्तेवैरियुद्धेभोगेवाराजदर्शने भोज्येस्नानेव्यवहारेदीप्तेरवि
शुभः १९ भुक्तमात्रेणमंदाग्नौस्त्रीणांवश्यादिकर्मणि शयनेसूर्यवाहेचकर्तव्यंसर्वदाबुधैः २० आ
णिसर्वकार्याणिविद्यानिच नानिसिद्ध्यंतिसूर्येणनात्रकार्याविचारणा २१ अथसुषुम्नालक्षणं वा राम

चे ५

मेवक्रणे दक्षे यदा वहति मारुतः सुषुम्णा सा च विज्ञेया सर्वकार्यहरा स्मृता तस्यां नाडौ स्थितो व
ह्निर्ज्वलते कालरूपिणम् २३ विषुवे तु विजानीयात्सर्वकार्यविनाशने क्षणं वामे क्षणं दक्षे विष
मभावमादिशेत् २४ विपरीते फलं ज्ञेयं ज्ञातव्यं च वरानने उभयोरेव संचारे विषुवं तु विदुर्बुधाः
२५ न कुर्यात्क्रूरसौम्यानि तत्सर्वं निष्फलं भवेत् जीविते मरणे प्रश्ने लाभालाभौ जयाजयौ वि
षमे विपरीतं स्यात्संस्मरेज्जगदीश्वरम् २६ ईश्वरे चिंतितं कार्यं योगाभ्यासादिकर्म सत् अन्यत्तै
व न कर्तव्यं जयलाभसुखैषिभिः २७ सूर्येण वहमानायां सुषुम्णायां मुहुर्मुहुः शापं दद्याद्व
रं दद्यात्सर्वथा च तदन्यथा २८ नाडीसंक्रमणे काले तत्त्वसंक्रमणे तथा शुभं किंचिन्न कर्तव्यं पु
ण्यदानादिकोटिषा २९ विषमस्योदये यात्रां मनसापि न चिंतयेत् यात्राहानिकरी यस्मान्मृत्युः
क्लेशो न संशयः ३० पुरो वामोर्ध्वतश्चन्द्रो दक्षाधः पृष्ठतो रविः पूर्णा रिक्ता विवेकोऽयं ज्ञातव्यो देशि
कैः सदा ३१ ऊर्ध्ववामाग्रतो दूतो ज्ञेयो वाममये स्थितः पृष्ठे दक्षे तथाधस्तात्सूर्यवाहगतः शुभः
३२ अनादिविषमा संधिर्निराहारा निराकुलाम् परे सूक्ष्मे विलीयेत सा संध्या संधिरुच्यते ३३ न
संध्या संधिमित्याहुः संध्या संधिर्निगद्यते विषुवत्संधिगाः प्राणाः सा संध्या संधिरुच्यते ३४ न वेदं

© Dharmartha Trust J&K. Digitized by eGangotri

स्व· ६

वेदमित्याहुः वेदोवेदोनविद्यते यत्रात्मा विद्यतेयेन सवेदोवेदउच्यते ३५ इतिनाडीभेदः अथ
तत्वनिर्णयः श्रीदेव्युवाच देवदेवमहादेवसर्वसंसारतारक स्थितंत्वदीयेहृदयेरहस्यंवदमेप्रभो
३६ ईश्वरउवाच स्वरज्ञानरहस्यात्तुनकिंचिदिष्टदेवता स्वरज्ञानरतोयोगीसयोगीपरमोमतः ३७
पंचतत्वाद्भवेत्सृष्टिस्तत्वेतत्वंविलीयते पंचतत्वंपरंतत्वंतत्वातीतंनिरंजनम् ३८ तत्वानांना
मविज्ञेयंसिद्धियोगेनयोगिनाम् भूतानांदुष्टचिह्नानिजानातीहस्वरोत्तमः ३९ पृथिव्यापस्त
थातेजोवायुराकाशमेवच पंचभूतात्मकंसर्वंयोजानातिसपंडितः ४० सर्वलोकस्यजीवानांनदे
हेभिन्नतत्वकम् भूर्लोकात्सत्यपर्यंतंनाडीभेदःपृथक्पृथक् ४१ वामेवादक्षिणेवापिउदयाःपं
चकीर्तिताः अष्टधातत्वविज्ञानेशृणुवक्ष्यामिसुंदरि ४२ प्रथमेतत्वसंख्यायांद्वितीयेश्वाससंधि
षु तृतीयेस्वरचिह्नानिचतुर्थेस्थानमेवच ४३ पंचमेतस्यवर्णाश्चषष्ठेतुप्राणमेवच सप्तमेस्वादसं
युक्तमष्टमेगतिलक्षणम् ४४ एवमष्टविधंप्राणंविषुवंतंचराचरम् स्वरात्परतरंदेविनान्यथा
त्वंबुजेक्षणे ४५ निरीक्षितव्यंयत्नेनसदाप्रत्यूषकालतः कालस्यवंचनार्थायकर्मकुर्वंतियो
गिनः ४६ श्रुत्योरंगुष्ठकौमध्यांगुल्यौनासापुटद्वये वदनेप्रांत्यकोपांत्यांगुलिंदद्याच्चनेत्रयोः ४७

राम ६

© Dharmartha Trust J&K. Digitized by eGangotri

अस्यांतस्तु पृथिव्यादितत्त्वज्ञानं भवेत्क्रमात् पीतश्वेतारुणश्यामैर्बिंदुभिर्निरुपाधिकः ४८ द
र्पणेन समालोक्य तत्र श्वासं विनिक्षिपेत् आकारैस्तु विजानीयात्तत्त्वभेदं विचक्षणः ४९ चतुरश्रं वा
र्धचंद्रं त्रिकोणं वर्तुलं स्मृतम् बिंदुभिस्तु नभो ज्ञेयमाकारैस्तत्त्वलक्षणम् ५० मध्ये पृथ्वी ह्यधश्चा
पश्चोर्ध्वं वहति चानलः तिर्यग्वायुप्रवाहश्च नभो वहति संक्रमे ५१ आपः श्वेताः क्षितिः पीता रक्त
वर्णो हुताशनः मारुतो नीलजीमूत आकाशः सर्ववर्णकः ५२ स्कंधद्वये स्थितो वह्निर्नाभिमूले
प्रभंजनः जानुदेशे क्षितिस्तोयं पादांते मस्तके नभः ५३ प्रथमे वहते वायुः द्वितीये वहतेऽनलः
तृतीये वहते माहेयश्चतुर्थे वारुणं वहेत् ५४ माहेये मधुरः स्वादः काषायो जलमेव च तिक्तं तेजः
समीराम्ल आकाशे कटुकं तथा ५५ अष्टांगुलं वहेद्वायुरनलश्चतुरंगुलः द्वादशांगुलं माहेयं षोड
शांगुलवारुणम् ५६ ऊर्ध्वं मृत्युरधः शांतिस्तिर्यगुच्चाटनं तथा मध्ये स्तंभं विजानीयान्नभः सर्व
त्र मध्यमः ५७ पृथिव्यां स्थिरकर्माणि चरकर्माणि वारुणे तेजसि क्रूरकर्माणि मारणोच्चाटनेऽनिले
५८ व्योम्नि न किंचित्कर्तव्यमभ्यसेद्योगसेवया शून्यता सर्वकार्येषु नात्र कार्या विचारणा ५९ पृ
थ्वीजलाभ्यां सिद्धिः स्यान्मृत्युर्वह्नौ क्षयोऽनिले नभसि निःफलं सर्वं ज्ञातव्यं तत्त्ववेदिभिः ६० चिर

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰

लाभः क्षितिर्ज्ञेयानलात्क्षणेतोयतन्वतः हानिः स्याद्वह्निवाताभ्यां नभसो निष्फलं भवेत् ६१ पीतःश
नैर्मध्यवाहने यावत्कुर्त्ध्वनिः मधुरः पार्थिवो वायुः स्थिरकार्यप्रकाशकः ६२ अधोवाही गुरुध्वानः
शीघ्रगः शीतलः स्थितः यः षोडशांगुलो वायुः स आपः शुभकर्मकृत् ६३ आवर्तगश्चात्युष्णो दि
शोणाभश्चतुरांगुलः ऊर्ध्ववाही च यः क्रूरः कर्मकारी स तैजसः ६४ उष्णः शीतः कृष्णवर्णस्तिर्यग्गामी
चाष्टांगुलः वायुः पवनसंज्ञो यश्चरकर्मसु सिद्धिदः ६५ यः समीरः समरसः सर्वतत्त्वगुणावहः अम्ब
रं तं विजानीयाद्योगिनां योगदायकम् ६६ तथा चवीनैव वचनष्कोणं मधुरं मध्यमाश्रितम् भो
गदं पार्थिवं तत्त्वं प्रवाहे द्वादशांगुले श्वेतमध्ये हुतवाशशांशाङ्काशायमोदकम् लभ्यकृदारुणं त
त्त्वं प्रवाहे षोडशांगुले रक्तं त्रिकोणं तन्केस्याद्दूर्ध्वमार्गप्रवाहकः दीप्तं च तेजसं तत्त्वं प्रवाहे चतुरांगु
ले ६७ नीलं च वर्तुलाकारं स्वादाम्लं तिर्यगाश्रितम् चपलं मारुतं तत्त्वं प्रवाहेऽष्टांगुलं स्मृतम् ६८
वर्णाकारः स्वादवहः अम्बरं सर्वगामि तेमो तदनामं मतं तत्सर्वकार्येषु निष्फलं ७२ पृथ्वीजलेशु
भं तत्त्वे तेजोमिश्रफलोदये हानिर्नस्युकरौ पुंसां अम्बभौव्यामममारुतौ ७२ आपः पूर्वं पश्चिमे पृ
थ्वी तेजश्च दक्षिणे तथा वायुश्चोत्तरे दिग्ज्ञेयाः मध्यकोणगतं नभः ७२ चन्द्रे पृथ्वीजले स्यातां सूर्ये

राम

© Dharmartha Trust J&K. Digitized by eGangotri

चाग्निर्यदा भवेत् तदा सिद्धिर्न संदेहः सौम्यासौम्येषु कर्मसु २८ लाभः पृथ्वीकृतो वह्निः स्यान्निशायां ला-
भमुत्तमम् वह्नौ मृत्युर्हानिर्वा यानस्थाने दहेन्ध्रुवम् २५ आयाति वात एतन्ने चलत्स्थायि स्युर्भेदतो
वयानि वायुतोन्यत्र हानिर्मृत्युर्नभेनले ३३ पृथिव्यां मूलचिन्ता स्याज्जीवस्य जलवातयोः तेजसो धा-
तुचिन्ता स्यान्शून्यमाकाशतो भवेत् पृथिव्यां बहुपादाः स्युः द्विपदस्तोयवायुतः तेजसि च चतुष्पादा
नभसि पादवर्जितः कुजो वह्निः रविः पृथ्वी सौरिरापः प्रकीर्तितः वायुस्थाने स्थितो राहुर्दक्षरंध्रप्र-
वाहकः ३८ जले चन्द्रो बुधः पृथ्वी गुरुर्वातः सितोऽनलः वामनाड्यां स्थिताः सर्वे सर्वकार्येषु निश्चिताः
३१ बुधोऽनलादि कुम्भे क्रो वह्निः रविः कुजस्तथा वायू राहुः शनिर्व्योम्नि गुरुरेवं प्रकीर्तिताः ३२ पृथिवी
मूलविज्ञाने जीवज्ञाने जलं तथा अग्नेर्याधातुविज्ञाने व्योम्निः शून्यं विनिर्दिशेत् ३३ तुष्टिः पुष्टिः रतिः
क्रीडा जयहर्षौ धरातले तेजोवायोश्च सुप्तः ज्वरकंपप्रवासिनः ३४ गतायुर्मृत्युराकाशे चेद्वा-
दशाप्रकीर्तिताः द्वादशैताः प्रयत्नेन ज्ञातव्या दैशिकैः सदा ३५ पूर्वा यां पश्चिमे याम्ये उत्तरस्यां यथाक्र-
मम् पृथिव्यादीनि भूतानि बलिष्ठानि विनिर्दिशेत् ३६ पृथिव्यापस्तथा तेजो वायुराकाशमेव च
पंचभूतात्मके देहे ज्ञातव्यं च वरानने ३७ अस्थि मांसं त्वचा नाडी रोम चैव तु पंचमं पृथिवी पंचगु-

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰
८
४८

णाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ८८ शुक्रशोणितमज्जा च मांसं लाला च पंचमं आपः पंचगुणाः प्रोक्ताः
ब्रह्मज्ञानेन भाषितं ८९ क्षुधा तृषा तथा निद्रा कान्तिरालस्यमेव च तेजः पंचगुणाः प्रोक्ता ब्रह्मज्ञानेन भा
षितम् ९९ धावनं वलनं गमनं संकोचनप्रसारणे वायुः पंचगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितं ९० राग
द्वेषस्तथा लज्जा भयमोहश्च पंचमः नभः पंचगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ९१ पृथिव्याः पलपंचा
शच्चत्वारिंशदापः पलस्तथा तेजस्त्रिंशद्विजानीयाद्वायुर्विंशतिर्दिङ्भः ९२ पार्थिवे चिरकाले च लाभस्त्वाये
क्षणमेव च जायते पवनात्स्वल्पसिद्धिः स्याद्व्योम्नि विनश्यति ९४ पृथिवी पंचापो वेदा गुणास्तेजो द्विवायु
नः नभ एकगुणं चैव तत्त्वज्ञानमिदं भवेत् ९५ फूत्कारकृत्प्रस्फुटिता विदीर्णपतिता यदा ददाति सर्व
कार्येषु अवस्थासदृशं फलं ९६ धनिष्ठा रोहिणी ज्येष्ठानुराधा श्रवणस्तथा अभिजिनोत्तराषाढा पृ
थ्वी तत्त्वमुदाहृतं पूर्वाषाढा तथाश्लेषा मूलमार्द्रा च रेवती उत्तराभाद्रपदं तोयतत्त्वं शतभिषा प्रिये
९७ भरणी कृत्तिका पुष्यं मघा पूर्वा च फाल्गुनी पूर्वाभाद्रपदा स्वाती तेजस्तत्त्वमिति प्रिये ९८ विशाखो
त्तरफाल्गुन्यो हस्तचित्रा पुनर्वसो अश्विनी मृगशीर्षे च वायुतत्त्वमुदाहृतम् १०० हृन्नाडीस्थितो
दूतो यत्पृच्छति शुभाशुभं तत्सर्वं सिद्धिमायाति शून्ये शून्यं न संशयः १०१ नन्वेरामा जयं प्राप्तः स न

राम
८

त्वेचयत्नेजयः कौरवानिहताः सर्वेयुद्धेतत्वविपर्यये २ जन्मांतरीयसंस्कारात्प्रसादादथवागु
रोः केषांचिज्जायतेतत्वभावनाविमलात्मना ३ अथपंचतत्वध्यानम् लंबीजंधरणींध्यायेच्च
तुरस्रांसपीतभं सुगंधंस्वर्णवर्णत्वमारोग्यंदेहलाघवम् ४ वंबीजंवारुणंध्यायेदर्धचंद्रंश
शिप्रभम् क्षुत्पिपासादिसहिष्णुत्वंजलमध्येचमज्जनम् ५ रंबीजंशिखिनंध्यायेत्त्रिकोणमरुण
प्रभम् बह्वन्नपानभोक्तृत्वमातपाग्निसहिष्णुता ६ यंबीजंपवनंध्यायेद्वर्तुलंश्यामलप्रभम्
व आकाशगमनाद्यंचपक्षिवद्गमनंतथा ७ हंबीजंगगनंध्यायेन्निराकारंबहुप्रभम् ज्ञानंत्रिकालविष
यमैश्वर्यमणिमादिकम् ८ स्वरज्ञानीनरोयत्रधनंनास्तिततःपरम् गम्यतेस्वरज्ञानेनअनायासःफ
लंभवेत् ९ इतितत्वध्यानम् अथयुद्धविजयः देव्युवाच॥ देवदेवमहादेवमहाज्ञानंस्वरोदयम्।
त्रिकालविषयंचैवकथंभवतिशंकर १० ईश्वरउवाच अर्थकालजयप्रश्नशुभाशुभमितित्रिधा एतत्त्रिका
लविज्ञानंनान्यद्भवतिसुन्दरि ११ तत्वेशुभाशुभंकार्यंतत्वेजयपराजयः तत्वेसमर्घमहर्घंचतत्वेत्रिपदमु
च्यते १२ देव्युवाच देवदेवमहादेवसर्वसंसारसागरे किंनराणांपरंमित्रंसर्वकार्यार्थसाधकम् १३॥
शिवउवाच॥ प्राणएवपरंमित्रंप्राणएवपरःसखा प्राणतुल्यःपरोबंधुर्नास्तिनास्तिवरानने १४ श्रीदेव्यु।

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰
५
9

याच कथं प्राणस्थितो वायुर्देहे किं प्राणरूपकम् नत्वेषु संचरन् प्राणो ज्ञायते योगिभिः कथं २५ श्रीदेव
उवाच ॥ कायानगरमध्ये तु मारुतो रक्षपालकः प्रवेशे दशभिः प्रोक्तो निर्गमे द्वादशांगुलः २६ गमने
चतुर्विंशन्नेत्रवेदास्तथा वेगे मैथुने पंचषष्टिश्च शयने च शतांगुलः २७ प्राणस्य तु गतिर्देवि स्वभावा
द्वादशांगुला भोजने वचने चैव गतिरष्टादशांगुला २८ एकांगुले कृते न्यूने प्राणे निःकामता मता आ
नंदस्तु द्वितीये स्यात्कविशक्तिः तृतीयके २९ वाचासिद्धिश्चतुर्थे तु दूरदृष्टिस्तु पंचमे षष्ठे त्वाकाशगमनं
चंडवेगश्च सप्तमे ३० अष्टमे सिद्धयश्चाष्टौ नवमे निधयो नव दशमे दशमूर्तिश्च छायानाशो दशैकके
३१ द्वादशे हंसचारश्च गंगामृतरसं पिबेत् आनखाग्रे प्राणपूर्णे कस्य भक्ष्यं च भोजनम् ३२ एवं प्राण
विधिः प्रोक्तः सर्वकार्यफलप्रदः ज्ञायते गुरुवाक्येन न तु विद्याशास्त्रकोटिभिः ३३ प्रातश्चंद्रो रविः सायं
यदि दैवान्न लभ्यते मध्याह्नान्मध्यरात्राच्च परतस्तौ प्रवर्त्तते ३४ दूरयुद्धे जयी चंद्रः समासन्ने दिवाकरः
वहन्नाड्यां गतः पादः सर्वसिद्धिः प्रजायते ३५ यात्रारंभे विवाहे च प्रवेशे नगरादिके शुभकार्येषु सर्वेषु चं
द्रचारः प्रशस्यते ३६ अयनतिथिदिनेशः स्वीयतत्वेन युक्तो यदि वहति कदाचिद्दैवयोगेन पुंसाम् जय
ति रिपुसैन्यं लभमात्रस्वरेण प्रभवति न च विघ्नं केशवस्यापि लोके ३७ जीवेरहो जीवरहो जीवोगयादि राम

५

पार्श्वे जीवो जयति यो युद्धे जीवेन जयते ति मेदिनीम् २८ भ्रमो जले च कर्तव्यं गमने शांतिकर्मसु वद्धो
वायौ प्रदीप्ते पुरे पुनर्नौभये प्यपि २९ जीवेन शस्त्रं बध्नीयाज्जीवेनैव विकाशयेत् जीवेन प्रक्षिपेत्कु
न्तं युद्धे जयति सर्वदा ३० आकृष्य प्राणपवनं समारोहेत वाहनम् समुत्तरे पदं दद्यात्सर्वकार्याणि सा
धयेत् अपूर्णे शत्रुसामग्री पूर्णे च स्वबलं यथा कुरुते पूर्णतत्त्वस्थो जयत्येकोवसुंधराम् ३२ यत्नाडीव
हते वा गं तत्स्थास्ते वाधिदेवता सन्मुखापि दिशा तेषां सर्वकार्यफलप्रदा ३३ आदौ तु क्रियते मुद्रा पश्चा
द्युद्धं समाचरेत् सर्पमुद्राकृता येन तेषां सिद्धिर्न संशयः ३४ चंद्रप्रवाहे प्यथ रविप्रवाहे भटाः समायांति
च योद्धुकामाः समीरणस्तत्त्वविदां प्रतीतो या शून्यता सा प्रतिकालरूपः ३५ यां दिशं वहते वा
युर्युद्धं तद्दिशि दापयेत् जयत्येवेन संदेहः शक्रोपि यदि चाग्रतः ३६ यत्र नाड्यां वहेद्वायुस्तदंगे प्राण
मेव च आकृष्य गच्छेत्कर्णांतं जयत्येव पुरंदरम् ३७ प्रतिपक्षप्रहारेभ्यः पूर्णांगं योभिरक्षते न तस्य
रिपुभिः शक्तिर्बलिष्ठैरपि नाशने ३८ अंगुष्ठतर्जनीवंशे पादांगुष्ठे तथा ध्वनि युद्धकाले च कर्तव्यं ल।
क्षयोधा जयी भवेत् ३९ निशाकरे रवौ चारे मध्ये यस्य समीरणः। स्थितो रक्षेद्दिगंतानि जयकांक्षी नरः
सदा ४० श्वासप्रवेशकाले तु दूतो जल्पति वांछितम् तस्यार्थसिद्धिमायाति निर्गमे नैव संवदेत् ४१ लाभा

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰ १०

दीर्घ्यपिकार्याणि इष्टानि कीर्तितानि च जीवे विशंति सिध्यंति शून्ये निःसरणे भवेत् ४२ नवेदत्तास्वकी
याच स्त्रियो वामा प्रशस्यते कुंभके पूर्णकाले च त्रयो नाडी त्रयो गतिः ४३ हकारस्य सकारस्य विनाभेद
स्वरः कथं सोऽहं हंसपदेनैव जीवो जयति सर्वदा ४४ शून्यांगं पूरितं कृत्वा जीवांगं गोपयेत्तु यः जीवां
गो॰ गे घातमाप्नोति शून्यांगं रिक्तते सदा ४५ वामे वा यदि वा दक्षे यदि पृच्छति पृच्छकः पूर्णे घातो न जायेत
शून्ये घातं विनिर्दिशेत् ४६ भूतत्वेनोदरे घातः पदस्थाने पुनाभवेत् ऊरुस्थाने ग्नितत्वेन करस्था
ने च वायुना ४७ शिरसि व्योमतत्वेन ज्ञातव्यो घातनिर्णयः एवं पंचविधो घातः स्वशास्त्रे प्रकाशि
तः ४८ युद्धद्वये कृते प्रश्ने पूर्णस्य प्रथमो जयः रिक्ते चैव द्वितीयस्तु जयी भवति नान्यथा ४९ पूर्ण
नाडीगतः पृष्ठे शून्यमंगं तदग्रतः शून्यस्थाने कृते शत्रुर्म्रियते नात्र संशयः ५० वामचारे समे नाम्नि
यस्य तस्य जयो भवेत् पृच्छको दक्षिणे भागे विजयी विषमाक्षरः यदा पृच्छति चेद्दूतस्तदा स्थानमादि
शेत् पृच्छकस्य दानस्सूर्ये स्थलदा जानीहि विग्रहम् ५१ पार्थिवे च समं युद्धं सिद्धिर्भवति वारुणे युद्धे
हि तेजसि भंगो मृत्युर्वायौ नभस्यपि ५२ निमित्तकं प्रमादाद्वा यदा न ज्ञायते निलः पृच्छाकाले तदा
कुर्यादिदं यत्नेन बुद्धिमान् निश्चलो धारणां कृत्वा पुष्पं हस्तान्निपातयेत् पूर्णांगे पुष्पपतने शून्ये वा

राम १०

© Dharmartha Trust J&K. Digitized by eGangotri

व.कं.३

तत्कालेव वदेत ५६ निष्कन्त्रप्रविशन्वापि प्राणमायेनिजेमनो मनोभंगमकुर्वाणः सर्वकार्येषु जी
वति ५५ स्वरज्ञानी वलादग्रेतिः फलं कोटियाभवेत् इह लोके परत्रे व स्वरज्ञानी वली सदा ५८
ग्रामानायुतं लक्षं देशाधिपवलं कचित शतक्रतुः सुरेंद्राणां कोटिगुणं भवेत् ५९ श्रीदेव्युवाच पर
स्परं मनुष्याणां युद्धे शाक्रो जयस्तथा यमयुद्धे समुत्पन्ने मनुष्याणां कथं जयः ६० श्रीईश्वर उवाच॥
ध्यायेद्देवं स्थिरे जीवे जुहुयाज्जीवसंगमे इष्टसिद्धिर्भवेत्तस्य महालाभो जयस्तथा ६१ निराकारात्
समुत्पन्ने साकारे सकलं जगत् तस्मात्काररे निपवा रत्नानि भवति तन्मयं ६२ इति युद्धजयप्रकर
णम् श्रीदेव्युवाच नरयुद्धं यमयुद्धं चान्ययोशाके महेश्वर ६३ इदानी देवदेशो वशीकरणकं वद ६३॥
श्रीईश्वर उवाच॥ चंद्रं सूर्येन चाकृष्य स्थापयेज्जीवमंडले आजन्म वशगा रामा कथितोयं तपोधनैः ६४
जीवेन गृह्यते जीवो जीवो यस्य प्रदीयते जीवस्थाने गतो जीवो वाला जीवांतकारकः ६५ रात्र्यंते यामवेला
यां प्रसुप्ते कामिनीजने ब्रह्मवीजं पिवेद्यस्तु वालाप्राणहरो नरः ६६ अष्टाक्षरं जपित्वा तु तस्मिन्काले गते
सति तत्क्षणं दीयते चंद्रो मोहमायाति कामिनी ६७ शयने वा प्रसंगे वा युवत्यालिंगनेपि वा यः सूर्येण
पिवेच्चंद्रं स भवेन्मकरध्वजः ६८ स्वयमालिंगने शन्ना प्रसंगे दक्षिणेपि वा तत्क्षणं दापयेत्सूमो

© Dharmartha Trust J&K. Digitized by eGangotri

स्व· ११

रुयेत्कामिनीशतम् ६८ सप्तमनवत्रय:पंचवारान्संरत्न सूर्यगो चंद्रे द्विसूर्यषष्ठे कृत्वा वश्या भवति का
मिनी ७० सूर्यचंद्रौ समाकृष्य सर्पाकोन्त्याथरोहयो: मन्त्रायदेम विसृष्टा वारंवा रमिदं चरेत् ७१ स्त्रा
ग्राणमितिपन्नस्यया वन्हिर्भावशंगता पश्चाज्जाग्रनवेलायां चोष्मतेगलचरुषी ७२ अनेन विधिना
कामी वशयेत्सर्वकामिनी इदं नवाच्यमन्यस्मिन्निष्यन्नापरमेश्वरि ७३ इति वश्यप्रकरणम् अथ गर्भ
प्रकरणम् ऋतुकाले भवानारी पंचमेन्द्रियदा भवेत् सूर्यचंद्रसमोयोगे सेवनान्सुत्रसंभव: ७४ शोक
वत्नीगवांहुरूपं पृच्छायोयोवहते यदा भर्तुरग्रे वदेद्वाक्यं गर्भदं हि त्रिभिर्वचः ७५ ऋतुस्नातापि वन्नारी
ऋतुदानेन योजयेत् रूपलावण्यसंपन्नो नर: सिंह: प्रसूयते ७६ सुषुम्णा सूर्यवाहेन ऋतुदानेन
योजयेत् अंगहीन: प्रमान्यस्तु जायते हृस्वविग्रह: ७७ विषमांके दिवारात्रौ विषमांके दिनाधिप: चं
द्रेनेत्राग्नितत्वेभ्यो वंध्यापुत्रमवाप्नुयात् ७८ ऋत्वारंभे रवि: पुंसां ऋत्वांतेन तुसधाकर: अनेन क्रम
योगेन नादत्ते दैवदण्डक: ७९ ऋत्वारंभे रवि: पुंसां स्त्रियांचैव सुधाकर: उभयो: संगमे प्राप्ते वंध्यापुत्र
मवाप्नुयात् ८० चंद्रे नाडीवहे प्रश्ने गर्भे कन्या तदा भवेत् सूर्ये भवेत्तदा पुत्रो द्वयोगर्भो विहन्यते ८१
चंद्रे स्त्री पुरुष: सूर्ये मध्यमार्गेन पंसक: गर्भप्रश्ने यदा हन्त: पूर्णे पुत्र: प्रजायते ८२ पृथ्वी पुत्री जले

राम
११

पुत्रः कन्यका च प्रभंजने तेजसः गर्भपातः स्यात् नभसापि नपुंसकः ८३ स्तन्ये स्तन्यं पुंगे पुंगं गर्भपात
स्वसंक्रमे सूर्यभागे तु पुत्रश्चेद्वारे तु कन्यका ८४ विषुवे गर्भपातः स्यात् भावी वा यदि नपुंसकः तत्व
वित्सु विज्ञाजीवी नीयात्क्षितितत्त्वसदा ८५ गर्भाधाने मारुते स्याद्बहुदुःखी दशाख्यानो वारुणी सौख्ययु
क्तः गर्भः स्याद्दीर्घजीवी च वह्नौ भोगी भवेद्यो पार्थिवेनार्थयुक्तः ८६ पवनवान् सौख्ययुक्तश्च भोगवा
न् गर्भसंस्थितः मात्रिस्थे वारुणे तत्त्वे व्योम्नि गर्भो विनश्यति ८७ मारुते दुःखमेनान्यति वारुणे दुहिता
भवेत् शेषेषु गर्भपातिः स्यात् जायमानस्य वा मृतिः ८८ रविमध्ये गतश्चन्द्रश्चन्द्रमध्ये गतो रविः ज्ञा
तव्यं गुरुतः शीघ्रं न वेदशास्त्रकोटिभिः ८९ इति गर्भप्रकरणम् अथ संवत्सरप्रकरणम् चैत्रशु
क्लप्रतिपदि प्रातः तत्त्वविभेदतः पश्येद्विचक्षणो योगी दक्षिणे चोत्तरायणे ९० चन्द्रोदयस्य वेलायां वह
मानेऽपि तत्त्वतः पृथिव्यापस्तथा वायुः सुभिक्षं सर्वसस्यजम् ९१ तेजो व्योम्नि भयं घोरं दुर्भिक्षं कालतत्त्व
तः एवं तत्त्वफलं ज्ञेयं वर्षे मासे दिने तथा ९२ मध्यमा भवति क्रूरा दुष्टा सर्वत्र कर्मसु देशभंगं महारोग
क्लेशकष्टादिदुःखदः ९३ मेषसंक्रान्तिवेलायां स्वरभेदं विचारयेत् संवत्सरफलं ब्रूयात् लोकानां त
त्वचिंतकः ९४ पृथिव्यादिकतत्त्वेन दिनमासाष्टजं फलम् शोभनं च तथा दुष्टं व्योममारुतवह्निभिः

© Dharmartha Trust J&K. Digitized by eGangotri

स-
१२

९५ सभिते राहुवृद्धिः स्याद्रूसस्या वसंपरा वदूदृष्टिलयामैां व्योप्तदृष्टवीनत्वे वदेद्यदि ९६ भूतिरष्टि
सभिते स्यादारोग्यं सौख्यं महच्च वदूसस्या नयाद्दृष्टवी आयतत्वे वदेद्यदि ९७ कुम्भे राहुभगः स्यात्
रोगोत्पत्तिः सदारुणा अल्पादल्पतरा दृष्टिरग्नितत्त्वे वदेद्यदि ९८ उत्पातोपद्रवाभीतिरल्पा दृष्टि
सुरातपः मेषसंक्रान्तिवेलायां वायुतत्त्वे वदेद्यदि ९९ मेषसंक्रान्तिवेलायां व्योमतत्त्वे वदेद्यदि तत्रापि
पिशून्यता तेयामस्यादीनां सुखस्य च १०० पूर्णप्रवर्तने स्वासे स्वतत्त्वेन च सिद्धिदः सूर्यचन्द्रे तथा भवेत्
सेग्रहः सर्वसिद्धिदः १ विषमे वह्नितत्त्वस्य जायते केवलेन भः तन्नाड्यो हस्त संग्राह्यौ मासे च महद्ध्वं
ना रवौ संक्रमणे नाडी गच्छन्ति च प्रसूयति स्वानि त्वे वह्नियोगे पि रोरवं यान्ति मन्तले २ इति संवत्सर प्र
करणम् अथ रोगप्रकरणम् महीतत्त्वे तु रोगं च जले च जलमातरः तेजसि खेटवायौ च शाकिनी
पित्तदोषवे ३ आदौ शून्यगते दूते पश्चात् पूर्णे विशेद्यदि मूर्छितोपि ध्रुवं जीवेद्यदर्थं परिपृच्छति
४ यस्मिन्नङ्गे स्थितो जीवः तत्रस्थ परिपृच्छति तदा जीवति जीवोसौ यदि रोगैरुपद्रुतः ५ दक्षिणेन
यदा वायुर्दूतो रौद्राक्षरै वदेत् तदा जीवति जीवोसौ चन्द्रे समफलं मतम् ६ जीवाकारं च वा ध्यात्वा जीवा
कारं विलोक्य च जीवस्थो जीविते प्रश्ने तस्य स्याज्जीवितं फलम् ७ वामाचारे तथा दूतः प्रविशेद्यत्र वाह

राम
१२

© Dharmartha Trust J&K. Digitized by eGangotri

नेनत्रस्थंयुक्तेनेहृतमलस्यासिद्धिर्नसंशयः ९ प्रश्नेचाधःस्थितोजीवोन्तर्नेजीवोहिजीवतिऊर्ध्वेचाधस्थि
तोजीवंजीवोयातियमालयम् १० विपरीताक्षरंप्रश्नेरिक्तायांपृच्छकोयदि विपर्ययंचविज्ञेयंविषमस्यो
दयोभवेत् ११ चंद्रस्थानेस्थितोजीवोसूर्यस्थानेतुपृच्छकः तदाप्राणविमुक्तोसौयदिवैद्यशतैर्वृतः १२ पिं
गलायांस्थितोजीवोवामेदूतस्तुपृच्छति तदापिम्रियतेरोगीयदित्राताहेश्वरः १३ एकस्यभूतस्यविप
र्ययेणरोगाधिभूतिर्भवतीहपुंसां तयोर्द्वयोर्बंधुसुहृद्विपत्तिःपक्षद्वयेव्यत्ययतोमृतिःस्यात् १४ इतिरो
गप्रकरणम् अथस्वरलक्षणम् मासादौवत्सरादौचपक्षादौचयथाक्रमम् क्षयेकालेपरीक्षेतवायुचा
रवशात्सुधी १५ पंचभूतात्मकेदीपेशशिस्नेहेनसिंचिते रक्षयेत्सूर्यवातेनततोजीवःस्थिरोभवेत् १६ मारु
तंबंधयित्वातुसूर्यंबंधयतेयदि अभ्यासाज्जीवतेजीवःसूर्यकालेपिवंच्यते १७ गगनात्स्रवतेचंद्रःका
यपद्मानिसिंचयेत् कर्मयोगसदाभ्यासैरमरःशशिसंश्रयात् १८ शशांकंवारयेद्रात्रौदिवावार्योदिवाक
रः इत्याभ्यासरतोनित्यंसयोगीनात्रसंशयः १९ अहोरात्रंयदैकत्रवहतेयस्यमारुतः तदातस्यभवेदा
युःसंपूर्णंवत्सरत्रयम् २० अहोरात्रद्वयंयस्यपिंगलायांसदागतिः तस्यवर्षद्वयंप्रोक्तंजीवितेतत्त्ववि दि
भिः २१ त्रिरात्रंवहतेयस्यवायुरेकपुटेस्थितः तदासंवत्सरायुष्यंप्रवदंतिमनीषिणः २२ रात्रौचेन्दुःदि

© Dharmartha Trust J&K. Digitized by eGangotri

वामेयो वहेद्यस्य निरंतरं जानीयात्तस्य वैमृत्युस्त्रिमासाभ्यंतरे भवेत् २३ एकादिषोडशाहानि यदि भा
स्व॰ नुर्निरंतरं वहेद्यस्य चैवमृत्युर्मासार्धेन च मासिके: २४ संपूर्णं वहते सूर्यश्चंद्रमा नैव दृश्यते पक्षेन जा
दे यते मृत्युः कालज्ञानेन भाषितम् २५ संपूर्णं वहते चंद्रः सूर्यं च नैव दृश्यते मासेन जायते मृत्युः काल
ज्ञानेन भाषितम् २६ मूत्रं पुरीषं वायुश्च समकालं प्रवर्तते तदासौ चलतो ज्ञेयो दशाहे म्रियते ध्रुवम्
13 २७ अरुंधती भवेज्जिह्वा ध्रुवो नासाग्रमेव च भ्रुवोर्विष्णुपदं ज्ञेयं तारकं मातृमंडलम् २८ अरुंधा
तीं ध्रुवं चैव विष्णोस्त्रीणि पदानि च आयुर्हीनो न पश्यंति चतुर्थं मातृमंडलं २९ नवरुद्रो वासरश्चाष्ट
पंचतारा त्रिनासिका जिह्वा एक दिने प्रोक्ते म्रियते मानवः ध्रुवम् ३० कोणादक्ष्णोरंगुलीभ्यां किंचित्पी
डनिरीक्षयेत् यदा न दृश्यते बिंदुर्दशाहेन जयो मृतः ३१ अथ नाडीज्ञानम् इडा गंगेति विज्ञेया
पिंगला यमुना नदी मध्ये सरस्वती विद्यात्प्रयागः संगमस्तथा ३२ आदौ साधनमाख्यातं सद्यः प्रत्य
य कारकम् बद्धपद्मासनो योगी बंधयेदुड्डियानकम् ३३ पूरकः कुंभकश्चैव रेचकश्च तृतीयकः ज्ञातव्या गु
योगिभिर्नित्यं देहसंशुद्धिहेतवे ३४ पूरकः कुरुते पुष्टिं धातुसाम्यं तथैव च कुंभकः स्तंभनं कुर्यात्
जीवरक्षां च कारयेत् विविधैर्नमः ३५ रेचको हरते पापं कुर्याद्योगिपदं व्रजेत् पश्चात्संग्राममवतिष्ठेत्

© Dharmartha Trust J&K. Digitized by eGangotri

लयबंधेच कारयेत् ३६ चंद्रंपिबतिसूर्यश्चसूर्यंपिबतिचंद्रमाः अन्योन्यकालभावेनजीवेत्तचंद्रा
र्कतारकम् ३७ स्वयंगेवहतेनाडीतेनाडीरोधनेकृते मुखंबद्ध्वासमंचैवपवनंजायतेयुवा ३८ मु
खनासाक्षिकर्णाभ्यामंगुलीभिर्निरोधयेत् तत्त्वोदयमितिज्ञेयंषण्मुखीकरणंप्रियः ३९ तस्यरू
पंगतिस्वादोमंडलंलक्षणंत्विदम् योवेत्तिमानवोलोकेसंसर्गादपियोगवित् ४० निराशीनिष्कलो
योगीनकिंचिदपिचिंतयेत् वासनामुन्मनींकृत्वाकालंजयतिलीलया ४१ विश्वस्यवेशिकाशक्ति
र्नेत्राभ्यांपरिदृश्यते तत्रस्थंतुमनोयस्ययाममात्रंभवेदिह ४२ तस्यायुर्वर्द्धतेनित्यंघटिकात्रयमानु
षः शिवेनोक्तंपुरातंत्रेसिद्धिसावगाहते ४३ बद्ध्वापद्मासनंयोगीगुदपवनेचसंततिरुभ्यादिमुच्यलाम्
तस्यापानरंध्रेकुंभकेजितमनिलेप्राणशक्त्यानिरुद्धः एकीभूतेसुषुम्णाविवरमुपगतेब्रह्मरंध्रेचनी
त्वानिक्षिप्याकाशमार्गेशिवसरणमतायातियेकेपिधन्याः ४४ एतज्ज्ञानानियोयोगीएतत्पठतिनित्य
शः सर्वदुःखविनिर्मुक्तोलभतेवांछितंफलं ४५ स्वरज्ञानेशिरोयस्यलक्ष्मीःपादतलेभवेत् एकत्रशमी
रेयस्यसुखंतस्यसदाभवेत् प्रणवः सर्ववेदानांब्रह्मांडेभास्करोयथा मर्त्यलोकेतथापूज्यः स्वरज्ञे
पुमानपि ४७ नाडीत्रयंविजानातितत्त्वज्ञानंतथैवच नैवतेनभवेत्तुल्यंलक्षकोटिरसायनं ४८

© Dharmartha Trust J&K. Digitized by eGangotri

पकारं स्वरं प्रदानारं नारीभेदं निवेदकम् । पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चानृणी भवेत् ४९ स्वरलब्धे
स्व. तथा युद्धे देवि वश्ये स्त्रियं तथा गर्भार्दे रोगकालाद्ये नवप्रकरणान्वितम् ५० एवं प्रवर्तितं लोके
१६ प्रसिद्धं सिद्धियोगिभिः ब्रह्मार्कग्रहजीयान्यं तो सिद्धिदायकम् ५१ इति श्रीशिवोमासंवादात्
नवप्रकरणान्विते पवनविजयी स्वरोदये संपूर्णम् ॥ ॥ ॥

14

© Dharmartha Trust J&K. Digitized by eGangotri